Total Pages—2 RNLKWC/IS/SANSKRIT/SAN-101/21

**End Semester Examination, 2021**

**Semester - I**

**Sanskrit**

**PAPER - SAN-101**

*Full Marks : 40*

*Time : 2 Hours*

(सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः )

1) **यथानिर्देशं प्रश्नाः समाधेया :**

क) **यथेच्छं प्रश्नद्वयम उत्तरत –** **2×2=4**

i) ``स जनास इन्द्र'' — इत्यस्य कोऽर्थः ?

ii) वाक्सूक्तस्य ऋषिच्छन्दोदैवतानि कानि ?

iii) पुरुषसूक्तं कस्य मण्डलस्य कतमं सूक्तम् ?

iv) अश्वे इव विषिते हासमाने गावेव शुभ्रे के स्तः ?

ख) **यथाकामं प्रश्नद्वयम् उत्तरत : –** **2×2=4**

i) माधवाचार्यस्य गुरोः नाम किम् आसीत् ? सः कस्य आदेशेन वेदार्थप्रकाशने प्रवृत्तोऽभूत् ?

ii) आपस्तम्बः कुत्र किं वेदलक्षणं प्रोक्तवान् ?

iii) अभिधानेऽर्थवादः इति सूत्रव्याख्यानकाले चत्वारि श्रृङ्ग इति मन्त्रे चतुर्-शब्देन के व्यपदिश्यन्ते ?

iv) निरुक्तस्य कति काण्डानि ? कानि च तानि ?

2) **यथानिर्देशम् उत्तरत ।**

क) **यथाथिलाषं मन्त्रद्वयं समाधत्त : –** **4×2=8**

i) सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्॥

(Turn Over)

ii) को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ।।

iii) यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे स्यासः।
यः सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः।।

iv) इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ।
देवोऽनयत् सविता सुपाणिस्तस्य वयं प्रसवे थाम उर्वीः।।

**ख) अनुप्रियं द्वौ समाधत्त –** **4×2=8**

i) उत त्वं सख्ये स्थिरपीतमाहुरित्यादिमन्त्रो व्याख्यायतामृ ।

ii) ऊहः इति सूत्रं व्याख्यात ।

iii) वेदस्य लक्षणं प्रमाणं च वर्णयत ।

iv) टीकां लिखत — शिक्षा ।

**३) यथानिर्देशं समाधेयम् –** **8×2=16**

क) नासदीयसूक्तनिहितं दार्शनिकं तत्त्वं प्रस्तूयताम् ।

**अथवा**

वाग्देवतायाः स्वरूपं वर्णयत ।

ख) वेदः पौरुषेयः अपौरुषेयो वेति विचार्यताम् ।

**अथवा**

ऋवेदस्य अभ्यर्हतत्वेऽपि किमर्थं सायणाचार्येण यजुर्वेदस्य व्याख्यानमादौ कृतम् ?